National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(58): 264-266
© 2025 NJHSR
www.sanskritarticle.com

**डॉ. प्रियरञ्जनरथः**
संविदाध्यापकः,
धर्मशास्त्रविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी

**Correspondence:**
**डॉ. प्रियरञ्जनरथः**
संविदाध्यापकः,
धर्मशास्त्रविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी

# निष्क्रमणसंस्कारः

**डॉ. प्रियरञ्जनरथः**

नामकरणसंस्कारात्परं षष्ठः संस्कारः निष्क्रमणसंस्कारो वर्तते। शिशुं बाह्यसंसारेण परिचालयितुं प्रथमवारं गृहाद् बहिः निष्क्रमणमेव अस्य संस्कारस्य मूलोद्देश्यं वर्तते। 'अथ निष्क्रमणं नाम गृहात्प्रथमनिर्गमः'। यथोक्तं जातकर्मसंस्कारे यत्प्रसवार्थं तदनुकूलो विशेषतन्नाहः शिशोर्जन्मतो मासैकपूर्वमेव प्रारभ्यते। रत्नाकरेण उदीरितम्-

"आसन्नप्रसवे मासि कुर्याच्चैव विशेषतः।"

एतदर्थं यो ह्युपयुक्तः कक्षो निश्चीयते स सूतिकाभिनमित्यवधीयते।
वारेऽनुकूले राशौ तु दिने दोषविवर्जिते।
स्वानुकूलदिशं प्रोक्तं सूतिकाभवनं बुधैः।।[1]

अस्मात्प्रसूतिगृहात्प्रथमनिर्गमनात्मकं कर्मैव निष्क्रमणसंस्कार उच्यते। सुरक्षार्थं प्रसूतिकागृहे किञ्चित्कालं स्थापितः शिशुः नियतकाल एव बहिरानीयते ।

प्रसूतिकागृहात् शिशोः बहिः निष्क्रमणं तस्य जीवनस्य महत्त्वपूर्ण सोपानं वर्तते। मातापितृभ्यामवसरोऽयं महान्तं हर्ष जनयति। परं बाह्यजीवनं तु प्राकृताप्राकृतिकैः कण्टकैः आकीर्णं भवति। तेभ्यः शिशुं संरक्षितुं देवानामर्चनम्, तेषामनुकम्पया आवाहनं चास्य संस्कारस्य मुख्यं कर्म वर्तते। अनेन कर्मणा शिशोः आयुषः श्रियसश्च वर्धनं भवति । बृहस्पत्यनुसारमेतस्य अननुष्ठानेन शिशोः पूर्वोक्तमुभयमेव नाशमाप्नुयात्-

अकृतायां क्रियायां स्यादायुः श्रीनाशनं शिशोः।
कृते सम्पद्विवृद्धिः स्यादायुर्वर्धनमेव च।।[2]

## ऐतिह्यम्-

अस्य संस्कारस्य वैदिकसंहितासु ब्राह्मणग्रन्थादौ वा स्पष्टोल्लेखो न लभ्यते । अत एव संस्कारोऽयं सूत्रकालिक एवाभिमन्यते। पारस्करगृह्यसूत्रे संस्कारेऽस्मिन् निष्क्रमणानन्तरं शिशुं सूर्यदर्शनं कारयितुं निर्दिष्टम्- 'सूर्यमुदीक्षयति तच्चक्षुरिति'।[3] गोभिलगृह्यसूत्रे चन्द्रदर्शनं निर्दिष्टम्[4]। आचार्यो यमस्तु सूर्यचन्द्रयोः उभयोरपि दर्शनं निर्दिशति-

ततस्तृतीये कर्तव्यं मासि सूर्यस्य दर्शनम्।
चतुर्थमासि कर्तव्यं शिशोश्चन्द्रस्य दर्शनम्।।[5]

श्रीधरीयेऽपि उक्तम्-

मासे तृतीये दिवसे दिनेशं शिशुं चतुर्थे शशिनञ्च धेनुम्।
विलोकयित्वा च विधिप्रयुक्ते काले गृहान्निष्क्रमणं विदध्यात्।।[6]

वस्तुतः गृह्यसूत्रेऽपि निष्क्रमणकर्मणो विधानमतीव साधारणं वर्तते। तत्र पिता शिशुं बहिरानीय 'तच्चक्षुर्देवहितम्....' इति मन्त्रेण सूर्य दर्शयति। स्मृतिषु निबन्धेषु चैवास्य कर्मानुष्ठानं व्यापकमभवत्।

**निष्क्रमणकालः -**

जन्मतो द्वादशदिवसाच्चतुर्थमासावधि निष्क्रमणं कर्तव्यमिति नैकानि मतान्युपलभ्यन्ते। तत्र निष्क्रमणात्प्राक् नान्दीश्राद्धं कार्यम्[7]। छन्दोगानां निष्क्रमणसंस्कारे तु नान्दीश्राद्धस्य प्रतिषेधो दृश्यते[8]। वराहो द्वादशेऽहनि शिशोः गृहान्निष्क्रमणं निर्दिशति[9]। भविष्यपुराणे बृहस्पतिस्मृतौ चापि निष्क्रमणं द्वादशेऽहनि उक्तम्[10]। एतत्तु तदानीमेव सम्भाव्येत यदा नामकरणेन सहैव संस्कारोऽयं सम्पाद्येत। यतोहि तस्मिन् दिने शिशुः प्रसूतिगृहाद् बहिरानीयते।

लौगाक्षिः जन्मतस्तृतीये मासि निष्क्रमणं निर्दिशति[11]। आचार्यो मनुः चतुर्थे मासि इदं **कर्मानुष्ठातुं प्रतिपादयति-**

'चतुर्थे मासि कर्तव्यं शिशोर्निष्क्रमणं गृहात् ।[12]

यमः तृतीये मासि सूर्यदर्शनं, चतुर्थे मासि च चन्द्रदर्शनं निर्दिशति। शौनकोऽपि चतुर्थे मासि शुक्लपक्षे शुभे नक्षत्रे निष्क्रमणं स्मरति-

'चतुर्थे मासि पुण्यर्थो शुक्ले निष्क्रमणं शिशोः।'

तत्र चतुर्थे मासि निष्क्रमणं विधातुमधिकांशवचनानि समुपलभ्यन्ते ।

यमः- उपनिष्क्रमणं कुर्याच्चतुर्थे मासि सावने ।[13]

आश्वलायनः- चतुर्थे मासि कार्य स्यादुपनिष्क्रमणं शिशोः।

शङ्खः-चतुर्थे मासि कर्तव्यं बालस्यादित्यदर्शनम् ।[14]

बृहस्पतिः - गृहनिष्क्रमणं सूनोश्चतुर्थे मासि कारयेत् ।[15]

विष्णुधर्मोत्तर - चतुर्थे मासि कर्तव्यं शिशोर्निष्क्रमणं गृहात्।

मानवगृह्यसूत्रे -अथादित्यदर्शनं चतुर्थे मासि।

बौधायनगृह्यसूत्रे -चतुर्थे मास्युपनिष्क्रमणम्।[16]

गृह्यपरिशिष्टे -निष्क्रमणं चतुर्थे मासि ।

इत्थं गृह्यसूत्राणां स्मृतीनां चानुसारं सामान्यो नियमो जन्मतस्तृतीये चतुर्थे वा मासि निष्क्रमणमनुष्ठातुं सिध्यति ।

केचनाचार्याः षष्ठे मासेऽपि निष्क्रमणं निर्दिशन्ति। आश्वलायनेन प्रोक्तम्- 'षष्ठे वा देवतास्थानमियादादाय तं शिशुम्'[17]। षष्ठे मास्येव अन्नप्राशनस्य प्रायेण विहितत्वात् अन्नप्राशनकाले निष्क्रमणविधायकानि वचनान्युपलभ्यन्ते । उक्तं मदनरत्ने-

'अन्नप्राशनकाले वा कुर्यान्निष्क्रमणक्रियाम्[18] ।'

अत्रेदमेव समाधातुं शक्यते यन्नैकेषामाचार्याणामनुरोधेन चतुर्थे मासि शिशोः गृहन्निष्क्रमणं मुख्यं वर्तते। अन्नप्राशनकाले तदनुष्ठानं तु पूर्वस्याभावे सत्येव विधेयम् ।

प्रशस्तः पक्षः - निष्क्रमणसंस्कारे शुक्लपक्षः शुभः प्रोक्तः। शुक्लपक्षासम्भवे कृष्णपक्षेऽपि संस्कारोऽयमनुष्ठेयः। परमस्य पक्षस्य त्रयोदशी-चतुर्दशी-अमावास्येति तिस्त्रस्तिथयोऽग्राह्याः।[19]

**प्रशस्तदिनानि-** सोम-बुध गुरु-शुक्रवासराः प्रशस्ताः सन्ति[20]। व्यासस्तु रिक्तामात्रं वर्ज्यमित्युक्त्वा रिक्ताव्यतिरिक्तास्तिथिः प्रशस्ता निर्दिशति[21]। परं मुहूर्तसंग्रहानुसारं रिक्ता (चतुर्थी, नवमी, चतुर्दशी), षष्ठी, अष्टमी, द्वादशी, अमावस्येति तिथयो निष्क्रमणेऽग्राह्या उक्ताः – 'रिक्ता षष्ठ्यष्टमीदर्शद्वादशीश्च विवर्जयेत्[22]।'

**प्रशस्तनक्षत्राणि –** अश्विनी, रोहिणी, मृगशिरः, पुनर्वसुः, पुष्यः, उत्तराफाल्गुनी, हस्तः, उत्तराषाढा, श्रवणः धनिष्ठा, उत्तराभाद्रपदा, रेवती एतानि निष्क्रमणे प्रशस्तनक्षत्राणि भवन्ति । यथा-

अश्विनी रेवती हस्तो धनिष्ठा रोहिणी तथा ।
श्रवणं पुण्यसंयुक्तं मृगेणोत्तरफाल्गुनी ।।
अनुराधोत्तराषाढा तथा चैव पुनर्वसुः ।
इमानि भानि शस्तानि शिशुनिष्क्रमणे विधौ ।।[23]

**संस्कर्ता –**

गृह्यसूत्रानुसारमस्मिन् संस्कारे मुख्यं कर्तृत्वं पितुरेव वर्तते। आश्वलायन आह 'शाकुन्ते प्रजयेत्सूक्ते शिशोर्निष्क्रमणे पिता[24]।' गोभिलोऽपि 'अपामञ्जलिं पूरयित्वा पितोपतिष्ठेत्।[25]' इति पितुरेव कर्तृत्वं निरदिशत्। शौनकस्तु 'विदधीतास्य पित्रादिर्हितैषी यश्च रक्षकः[26]। 'इत्यत्र पित्रादिना पितामहादिरपि निष्क्रमणं कुर्यादिति प्रत्यपादयत् । तत्तु पितुः कथञ्चिदभावे असामर्थ्य वा प्रतीयते ।

मुहूर्तसंग्रहे निष्क्रमणे मातुलस्य कर्तृत्वं प्रतिपादितम्- 'उपनिष्क्रमणे शास्ता मातुलो वाहयेच्छिशुम्।[27] भगिनेयमुद्दिश्य मातुलस्य स्नेह एव तत्र कारणभूतं लक्ष्यते । विष्णुधर्मोत्तरपुराणं धात्र्या शिशुं बहिः
निष्कामयितुं विधत्ते-

ततस्त्वलंकृता धात्री बालमादाय पूजितम् ।
बहिर्निष्कासयेद् गेहात् शङ्खपुण्याहनिःस्वनैः।।[28]

**निष्क्रमणविधिः -**

संस्काराय निश्चिते दिने गोमयेनोपलिप्यते चतुरस्त्रे प्राङ्गणे धान्यपुञ्जे शिशुमादाय माता पिता वा उपवेशयति[29]। तस्मात्प्राङ्गणात्सूर्यो दृश्येत। उपवेशनात्परं समलङ्कृतं भूषणभूषितं शिशुं गृहात्कुलदेवायतनं नयेत्। तत्र वाद्यसङ्गीतपुरस्सरं कुलदेवमर्चयेत्। दिक्पालान्, सूर्यचन्द्रौ, आकाशं, वसुदेवं चापि पूजयेत्। ततो ब्राह्मणान् भोजयित्वा स्वस्तिवाचनपूर्वकं शकुन्तदेवताकं सूक्तद्वयं जपेत् । शकुन्तदेवताकं सूक्तद्वयम् । प्रथमं सूक्तम्-

कनिक्रदज्जनुषं प्रब्रुवाण इयर्ति वाचमरितेव नावम्।
सुमङ्गलश्च शकुने भवासि मा त्वा
काचिदभिभा विश्वा विदत ।।
मा त्वा श्येन उद्वधीन्मा सुपर्णो
मा त्वा विददिषुमान् वीरो अस्ता ।
पित्र्यामनु प्रदिशं कनिक्रदत्सुमङ्गलो भद्रवादी वदेह।
अव क्रन्द दक्षिणतो गृहाणां सुमङ्गलो भद्रवादी शकुन्ते।
मा नः स्तेन ईशत माघसंशो बृहद्वदेम विदमे सुवीराः।।[30]

द्वितीयं सूक्तम्-

प्रदक्षिणिदभि गृणन्ति कारवो वयो वदन्त ऋतुथा शकुन्तयः।
उभौ वाचौ वदति सामगा इव गायत्रं च त्रैष्ठभं चानु राजति।।

उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि। वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमा वद विश्वतो नः शकुने पुण्यमा वद ।

आवदस्त्वं शकुने भद्रमा वद तूष्णीमासीनः सुमतिं चिकिद्धि नः।
यदुत्पतन् वदसि कर्करिर्यथा बृहद्वदेम विदथे सुवीराः ।।[31]

शकुन्तसूक्तस्य स्थाने निम्नलिखितः श्लोकोऽपि उच्चार्यते-

अप्रमत्तं प्रमत्तं वा दिवा रात्रावथापि वा।
रक्षन्तु सततं सर्वे देवाः शुक्रपुरोगमाः।।[32]

अर्थात् अयं शिशुः अप्रमत्तः प्रमत्तो वा स्यात्, दिनं रात्रिर्वा स्यात्, इन्द्रस्य नेतृत्वमाधानाः सर्वे देवा एनं सर्वदा रक्षन्तु ।

ततः वाद्यस्वस्त्ययनादिभिः सह धात्री शिशुमादाय गृहाद्बहिर्नयेत्। निष्क्रमणवेलायां द्विजान् अष्टविधानि मङ्गलानि च शिशोः पुरो नयेत्। तत्राष्टौ मङ्गलानि सन्ति-

1.दर्पणः 2.कलशः 3.कन्या 4.पुष्पाणि 5.अक्षताः 6.दीपमाला 7. ध्वजः, 8. लाजाः ।

यथोक्तं विधिरत्ने-

दर्पणः कलशः कन्या तथा सुमनसोऽक्षताः।
दीपमाला ध्वजो लाजाः संप्रोक्तं मङ्गलाष्टकम्।।
विवाहे निष्क्रमे कार्ये वृद्धौ पूर्ते समागमे।
उत्सवेषु च यात्रायां प्रशस्तं मङ्गलाष्टकम्।।[33]

गृहान्निष्क्रम्य शिशुं देवालयं नीत्वा धूप-पुष्प-मालादिभिः देवं पूजयेत्। प्रदक्षिणं कारयित्वा देवमाराध्य प्रणमय्य च शिशुं तत्रस्थैः ब्राह्मणादिभिः आशिषः प्रदाप्यदेवालयाद् बहिरानयेत्। ततः शौनकमतानुसारं मातुलादिसमा-सन्नबन्धोः गृहं प्रापयेत्। तत्र चोपहारादिभिः शिशुलालनात्परं शिशुं स्वगृहं नयेत्[34] ।

बृहस्पतिना निष्क्रमणविधिः किमिव भिन्नरीत्या प्रदर्शितो वर्तते "शिशुमलंकृत्य धवलाक्षतादिभिः पूजोपकरणैः समभ्यर्च्य स्वस्तिवाचनं कृत्वा कारयित्वा वा समारूढवाहनं शिशुं गृहान्निष्क्रामयेत् । अथवा मातुल एव शिशुं वहेत् । वाद्यादिकमपि कारयेत्। ततश्च गोमयोपलिप्ते चतुरस्र स्थले धान्यपुञ्जे शिशुं समावेश्य गन्धपुष्पाद्यैः तं मूर्धिन ललाटे च समर्चयेत् । ततश्च महामृत्युञ्जयमन्त्रं जपेत् । गणेशादिपूजनं चान्ते विधाय शिशून् समभ्यर्चन्नेव कर्म समापयेत्[35] ।

वस्तुतः संस्कारोऽयमभिप्रैति यत् निश्चितावधेः परं शिशुः गृहाद्बहिः मुक्तपरिवेशे आनीयेत । संस्कारोऽयं स्त्रिया अप्यनुष्ठेयः, परममन्त्रकः। याज्ञवल्क्यः 'चतुर्थे मासि निष्क्रमः' इत्युपक्रमे 'तूष्णीमेताः क्रियाः स्त्रीणाम्'[36] इत्यवोचत्। मनुरपि शारीरं संस्कारममुममन्त्रकमनुष्ठातुं निर्दिशति-

अमत्रिका तु कार्येयं स्त्रीणामावृदशेषतः।
संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम्।।[37]

**पादट्टीपणी -**

1 बृहस्पतिः, सं.र.मा., पृ. ८८६
2 वी.मि., सं.भा.१, पृ. १८४
3 गर्गः, सं.र.मा., पृ. ८८६
4 वी.मि., सं.प्र., पृ. २५६
5 पा.गृ.सू. १/१७/६
6 गो.गृ.सू. २/८/६७
7 वी.मि., सं.प्र., पृ. २५०
8 सं.र.मा., पृ. ८८६
9 आश्वलायनः 'अन्यैः षोडशसंस्कारश्रावण्यादिष्वपीष्यते । 'वी.मि., सं.प्र., पृ. २५५
10 .छाद्योगपरिशिष्टे 'सूर्येन्द्वोः कर्मणी ये च तयोः श्राद्धं न विद्यते। पा.गृ.ग.भा. १/१७
11 द्वादशऽहनि कर्तव्यं शिशोर्निष्क्रमणं गृहात् । सं.र.मा., पृ. ८८६
12 भविष्यपुराणे- द्वादशेऽहनि राजेन्द्र शिशोर्निष्क्रमणं गृहात् । वी.मि., सं.प्र., पृ. २५०
13 तृतीयेऽर्धमासे दर्शनमादित्यस्येति । वी.मि., सं.प्र., पृ. २५०
14 म.स्मृ. २/३४
15 वी.मि., सं.प्र., पृ. २५१
16 वी.मि., सं.म., पृ. २७
17 वी.मि., सं.प्र., पृ. २५१
18 बौ.गृ.सू., पृ. २/२/१
19 वी.मि., सं.प्र., पृ. २५१
20 नि.सि., पृ. ५१८
21 मुहूर्तसंग्रहे- शुक्लपक्षः शुभः प्रोक्तः, कृष्णश्चान्त्यत्रिकं विना । वी.मि., सं.म., पृ. २७
22 सं.र.मा., पृ. ८८८
23 कुर्यान्निष्क्रमणं शिशोर्बुधगुरौ शुक्रेष्वरिक्तातिथौ । पा.गृ.सू.भा. १/१७
24 सं.र.मा., पृ. ८८६
25 बृहस्पतिः वी.मि., सं.प्र., पृ. २५२
26 वी.मि., सं.प्र., पृ. २२५
27 गो.गृ. २/८/६
28 वी.मि., सं.प्र., पृ. २२५
29 वी.मि., सं.प्र., पृ. ३५३
30 वी.मि., सं.प्र., पृ. ३५३
31 बृहस्पतिः चतुरस्त्रे शुचौ देशे गोमयेनोपलेपिते । धान्यपुञ्जे समासीनं बालं बालामथापि ।। वी.मि., सं.प्र., पृ. ३५५
32 विष्णुधर्मोत्तरे, सं.प्र., पृ. ३५३
33 सं.र.मा., पृ. ८८७
34 वी.मि., सं.प्र., पृ. २५४
35 सं.प्र., पृ. २५४-२५५
36 या.स्मृ. १/१२
37 म.स्मृ. २/६६